# শালিগ্রামস্তোত্রম্

{॥ শালিগ্রামস্তোত্রম্ ॥}

শ্রী গণেশায নমঃ ।

অস্য শ্রীশালিগ্রামস্তোত্রমন্ত্রস্য শ্রীভগবান্ ঋষিঃ,

নারাযণো দেবতা, অনুষ্টুপ্ ছন্দঃ,

শ্রীশালিগ্রামস্তোত্রমন্ত্রজপে বিনিযোগঃ ॥

যুধিষ্ঠির উবাচ ।

শ্রীদেবদেব দেবেশ দেবতার্চনমুত্তমম্ ।

তৎসর্বং শ্রোতুমিচ্ছামি ব্রূহি মে পুরুষোত্তম ॥ ১॥

শ্রীভগবানুবাচ ।

গণ্ডক্যাং চোত্তরে তীরে গিরিরাজস্য দক্ষিণে ।

দশযোজনবিস্তীর্ণা মহাক্ষেত্রবসুন্ধরা ॥ ২॥

শালিগ্রামো ভবেদ্দেবো দেবী দ্বারাবতী ভবেত্ ।

উভযোঃ সঙ্গমো যত্র মুক্তিস্তত্র ন সংশযঃ ॥ ৩॥

শালিগ্রামশিলা যত্র যত্র দ্বারাবতী শিলা ।

উভযোঃ সঙ্গমো যত্র মুক্তিস্তত্র ন সংশযঃ ॥ ৪॥

Stotram Digitalized By Sanskritdocuments.org

আজন্মকৃতপাপানাং প্রাযশ্চিত্তং য ইচ্ছতি ।
শালিগ্রামশিলাবারি পাপহারি নমোঽস্তু তে ॥ ৫॥

অকালমৃত্যুহরণং সর্বব্যাধিবিনাশনম্ ।
বিষ্ণোঃ পাদোদকং পীত্বা শিরসা ধারযাম্যহম্ ॥ ৬॥

শঙ্খমধ্যে স্থিতং তোযং ভ্রামিতং কেশবোপরি ।
অঙ্গলগ্নং মনুষ্যাণাং ব্রহ্মহত্যাদিকং দহেত্ ॥ ৭॥

স্নানোদকং পিবেন্নিত্যং চক্রাঙ্কিতশিলোদ্ভবম্ ।
প্রক্ষাল্য শুদ্ধং তত্তোযং ব্রহ্মহত্যাং ব্যপোহতি ॥ ৮॥

অগ্নিষ্টোমসহস্রাণি বাজপেযশতানি চ ।
সম্যক্ ফলমবাপ্নোতি বিষ্ণোর্নৈবেদ্যভক্ষণাত্ ॥ ৯॥

নৈবেদ্যযুক্তাং তুলসীং চ মিশ্রিতাং বিশেষতঃ পাদজলেন বিষ্ণোঃ ।
যোঽশ্নাতি নিত্যং পুরতো মুরারেঃ প্রাপ্নোতি যজ্ঞাযুতকোটিপুণ্যম্ ॥ ১০॥

খণ্ডিতাঃ স্ফুটিতা ভিন্না বহ্নিদগ্ধাস্তথৈব চ ।
শালিগ্রামশিলা যত্র তত্র দোষো ন বিদ্যতে ॥ ১১॥

ন মন্ত্রঃ পূজনং নৈব ন তীর্থং ন চ ভাবনা ।

ন স্তুতির্নোপচারশ্চ শালিগ্রামশিলার্চনে ॥ ১২॥

ব্রহ্মহত্যাদিকং পাপং মনোবাক্কায়সম্ভবম্ ।

শীঘ্রং নশ্যতি তৎসর্বং শালিগ্রামশিলার্চনাত্ ॥ ১৩॥

নানাবর্ণময়ং চৈব নানাভোগেন বেষ্টিতম্ ।

তথা বরপ্রসাদেন লক্ষ্মীকান্তং বদাম্যহম্ ॥ ১৪॥

নারায়ণোদ্ভবো দেবশ্চক্রমধ্যে চ কর্মণা ।

তথা বরপ্রসাদেন লক্ষ্মীকান্তং বদাম্যহম্ ॥ ১৫॥

কৃষ্ণে শিলাতলে যত্র সূক্ষ্মং চক্রং চ দৃশ্যতে ।

সৌভাগ্যং সন্ততিং ধত্তে সর্ব সৌখ্যং দদাতি চ ॥ ১৬॥

বাসুদেবস্য চিহ্নানি দৃষ্ট্বা পাপৈঃ প্রমুচ্যতে ।

শ্রীধরঃ সুকরে বামে হরিদ্বর্ণস্তু দৃশ্যতে ॥ ১৭॥

বরাহরূপিণং দেবং কূর্মাঙ্গৈরপি চিহ্নিতম্ ।

গোপদং তত্র দৃশ্যেত বারাহং বামনং তথা ॥ ১৮॥

পীতবর্ণং তু দেবানাং রক্তবর্ণং ভযাবহম্ ।

নারসিংহো ভবেদ্দেবো মোক্ষদং চ প্রকীর্তিতম্ ॥ ১৯॥

শঙ্খচক্রগদাকূর্মাঃ শঙ্খো যত্র প্রদৃশ্যতে ।

শঙ্খবর্ণস্য দেবানাং বামে দেবস্য লক্ষণম্ ॥ ২০॥

দামোদরং তথা স্থূলং মধ্যে চক্রং প্রতিষ্ঠিতম্ ।

পূর্ণদ্বারেণ সঙ্কীর্ণা পীতরেখা চ দৃশ্যতে ॥ ২১॥

ছত্রাকারে ভবেদ্রাজ্যং বর্তুলে চ মহাশ্রিয়ঃ ।

চিপিটে চ মহাদুঃখং শূলাগ্রে তু রণং ধ্রুবম্ ॥ ২২॥

ললাটে শেষভোগস্তু শিরোপরি সুকাঞ্চনম্ ।

চক্রকাঞ্চনবর্ণানাং বামদেবস্য লক্ষণম্ ॥ ২৩॥

বামপার্শ্বে চ বৈ চক্রে কৃষ্ণবর্ণস্তু পিঙ্গলম্ ।

লক্ষ্মীনৃসিংহদেবানাং পৃথগ্বর্ণস্তু দৃশ্যতে ॥ ২৪॥

লম্বোষ্ঠে চ দরিদ্রং স্যাৎপিঙ্গলে হানিরেব চ ।

লগ্নচক্রে ভবেদ্ব্যাধির্বিদারে মরণং ধ্রুবম্ ॥ ২৫॥

পাদোদকং চ নির্মাল্যং মস্তকে ধারযেৎসদা ।

বিষ্ণোর্দ্দিষ্টং ভক্ষিতব্যং তুলসীদলমিশ্রিতম্ ॥ ২৬॥

কল্পকোটিসহস্রাণি বৈকুণ্ঠে বসতে সদা ।

শালিগ্রামশিলাবিন্দুর্হত্যাকোটিবিনাশনঃ ॥ ২৭॥

তস্মাৎসম্পূজযেদ্ধ্যাত্বা পূজিতং চাপি সর্বদা ।
শালিগ্রামশিলাস্তোত্রং যঃ পঠেচ্চ দ্বিজোত্তমঃ ॥ ২৮॥

স গচ্ছেৎপরমং স্থানং যত্র লোকেশ্বরো হরিঃ ।
সর্বপাপবিনির্মুক্তো বিষ্ণুলোকং স গচ্ছতি ॥ ২৯॥

দশাবতারো দেবানাং পৃথগ্বর্ণস্তু দৃশ্যতে ।
ঈপ্সিতং লভতে রাজ্যং বিষ্ণুপূজামনুক্রমাত্ ॥ ৩০॥

কোট্যো হি ব্রহ্মহত্যানামগম্যাগম্যকোটযঃ ।
তাঃ সর্বা নাশমাযান্তি বিষ্ণুনৈবেদ্যভক্ষণাত্ ॥ ৩১॥

বিষ্ণোঃ পাদোদকং পীত্বা কোটিজন্মাঘনাশনম্ ।
তস্মাদষ্টগুণং পাপং ভূমৌ বিন্দুনিপাতনাত্ ॥ ৩২॥

। ইতি শ্রীভবিষ্যোত্তরপুরাণে শ্রীকৃষ্ণযুধিষ্ঠিরসংবাদে
শালিগ্রামস্তোত্রং সম্পূর্ণম্ ।

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shaligrama Stotram Lyrics in Bengali PDF
% File name : shaaligraama.itx
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : bhaviShyottarapurANa
% Latest update : December 22, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website